# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

# संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

उपविषयः- अच्सन्धिप्रकरणम् (खण्ड-ङ)

डॉ. श्याम कुमार झा
सह- आचार्यः, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

# पदसाधनम्

## (लघुसिद्धान्तकौमुदी)

## अच्सन्धिप्रकरणम्

दैत्यारिः

दैत्य+अरिः

दैत्य् आ रिः 'अकः सवर्णे दीर्घः' इति सूत्रेण अकार-अकारयोः आकारः इति दीर्घैकादेशे

दैत्यारिः पदसिद्धम्।

# श्रीशः

श्री+ईशः

श्र् ई शः ‘अकः सवर्णे दीर्घः’ इति सूत्रेण ईकार-ईकारयोः ईकार इति दीर्घैकादेशे

श्रीशः पदसिद्धम् ।

# विष्णूदयः

विष्णु+उदयः
विष्ण् ऊ दयः 'अकः सवर्णे दीर्घः' इति सूत्रेण उकार-उकारयोः ऊकार इति दीर्घैकादेशे
विष्णूदयः पदसिद्धम्।

# होतॄकारः

होतृ+ऋकारः

होत् ऋ कारः 'अकः सवर्णे दीर्घः' इति सूत्रेण ऋकार-ऋकारयोः ॠकार इति दीर्घैकादेशे

होतॄकारः पदसिद्धम्।

# हरेऽव

हरे + अव

हर् ए व ‘एचोऽयवायावः’ इति सूत्रेण अवादेशे प्राप्ते

‘एङः पदान्तादति’ इति सूत्रेण एकार-अकारयोः एकार इति पूर्वरूपप्राप्ते

हरेऽव पदसिद्धम्।

# विष्णोऽव

विष्णो+अव

विष्ण् ओ व ‘एचोऽयवायाव:’ इति सूत्रेण अवादेशे प्राप्ते

‘एङः पदान्तादति’ इति सूत्रेण ओकार-अकारयोः ओकारः इति पूर्वरूपप्राप्ते

विष्णोऽव पदसिद्धम् ।

# हरी एतौ

हरी+एतौ

हरी एतौ — इको यणचि इति सूत्रेण यणादेशे प्रप्ते तंप्रबाध्य ‘ईदूदेद्विवचनं प्रगृह्यम्’ इति सूत्रेण प्रकृतिभावे

हरी एतौ — पदसिद्धम्।

# विष्णू इमौ

विष्णू+इमौ

विष्णू इमौ इको यणचि इति सूत्रेण यणादेशे प्रप्ते तंप्रबाध्य 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रेण प्रकृतिभावे

विष्णू इमौ पदसिद्धम्।

गङ्गे अमू

गङ्गे+अमू

गङ्गे अमू एचोऽयवायावः इति सूत्रेण अयादेशे प्राप्ते तंप्रबाध्य ‘ईदूदेद्द्विवचनं प्रगृह्यम्’ इति सूत्रेण प्रकृतिभावे

गङ्गे अमू पदसिद्धम्।

# धन्यवादः